# Skandaproktam Shivamahimavarnanam 1

# સ્કન્દપ્રોક્તં શિવમહિમાવર્ણનમ્ ૧

## Document Information

Text title : Skandaproktam Shivamahimavarnanam 1

File name : skandaproktaMshivamahimAvarNanam1.itx

Category : shiva, shivarahasya

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | bhImAkhyaH aShTamAMshaH | adhyAyaH 3 | 10-32||

Latest update : July 4, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

July 5, 2024

*sanskritdocuments.org*

# સ્કન્દપ્રોક્તં શિવમહિમાવર્ણનમ્ ૧

(શિવરહસ્યાન્તર્ગતે ભીમાખ્યે)

સ્કન્દ (ઉવાચ)

સ ગૌરીહૃદયાનન્દ આનન્દામ્બુનિધિઃ સ્વયમ્ ।
ભક્ત્યા ભક્તૈઃ સ્તુતો નિત્યં વેદવેદ્યો મહેશ્વરઃ ॥ ૧૦॥

દદાતિ મોક્ષસામ્રાજ્યં પ્રાજ્યં દેવશિખામણિઃ ।
રાજ્યં વા શિવભક્તાનાં મન્નામાજ્યપ્લુતં સદા ॥ ૧૧॥

વાણીપતેરયં પ્રાદાદ્વેદજાલં કૃપાબલાત્ ।
શર્વાણીપતિરેવાથ ચારુચન્દ્રલસચ્છિરાઃ ॥ ૧૨॥

રમારમણહારીશઃ સ ગૌરીરમણો હરઃ ।
દદાત્યેવ હિ ભક્તેષુ શામ્ભવેષુ કૃપાવશાત્ ॥ ૧૩॥

સ એવ ગીયતે વેદૈર્વેદાન્તૈરપિ શઙ્કરઃ ।
સ એવ સર્વદેવેશો મૃત્યુઞ્જય ઉમાપતિઃ ॥ ૧૪॥

સ એવ ભગવાઞ્છમ્ભુઃ શ્રુતશ્ચાથર્વણે શિવઃ ।
યસ્યૈશ્વર્યસ્ય નાન્તોઽસ્તિ સર્વગઃ સર્વદા પ્રભુઃ ॥ ૧૫॥

યદ્ધ્યાનેન પરા મુક્તિઃ સુલભા શામ્ભવોત્તમે ।
સ ગૌરીરમણો દેવઃ કાલકામાન્ધનાશનઃ ॥ ૧૬॥

સ તુ મૃત્યુઞ્જયો નિત્યમપારવિભવાશ્રયઃ ।
યસ્ય પ્રસાદલેશેન વિષ્ણુબ્રહ્મેન્દ્રપૂર્વકાઃ ॥ ૧૭॥

ધિષ્ટિતાનિ વૃતાઃ સર્વે શિપિવિષ્ટપદાર્ચકાઃ ।
ઉદારતરગમ્ભીરો ભવમાયામલાપહઃ ॥ ૧૮॥

સર્વદુઃખહરો દેવો રુદ્રો વૈ નીલલોહિતઃ ।
ય એનં વિદુરીશાનમમૃતાસ્તે સદા મુને ॥ ૧૯॥

અથેતરે દુઃખમેવ પ્રાપ્નુવન્તિ પદે પદે ।
યસ્ય વામાઙ્ગગા દેવી યા સા સર્વેશ્વરી શિવા ॥ ૨૦॥

યન્માયયા મોહિતા વૈ બ્રહ્મેન્દ્રાશ્ચાપ્યધોક્ષજઃ ।
યસ્યાઃ પ્રસાદલેશેન ન જાનન્તિ મહેશ્વરમ્ ॥ ૨૧॥

સ્વાત્માનં સર્વગં શાન્તં સચ્ચિન્મયમુમાધવમ્ ।
યસ્ય પુત્રો ગણાધીશઃ સર્વવિઘ્નનિવારકઃ ॥ ૨૨॥

યસ્ય પુત્રોઽહમેવાદ્ય સાક્ષાજ્જ્ઞાનાત્મકો મુને ।
યસ્ય નન્દ્યાદયો વિપ્રગણઃ શાઙ્કરપુઙ્ગવાઃ ॥ ૨૩॥

યસ્ય ધર્મો મહાબાહો યુગપાદોઽમિતદ્યુતિઃ ।
યસ્યાષ્ટમૂર્તિભિર્વ્યાપ્તં જગદેતચ્ચરાચરમ્ ॥ ૨૪॥

યસ્ય લિઙ્ગં સદા કાલં પૂજયન્તિ મરુદ્ગણાઃ ।
બલપ્રમથનં સામ્બં ભક્તસંસારમોચકમ્ ॥ ૨૫॥

કારણં જગતામીશમાનન્દઘનમદ્વયમ્ ।
યો વૈ રુદ્રો મહાદેવઃ શઙ્કરઃ શશિશેખરઃ ॥ ૨૬॥

યો વૈ રુદ્રો મહાદેવઃ ભૂતં ભવ્યં ભવજ્જગત્ ।
વિશ્વં ભૂતં ચ ભવનં વિચિત્રં સ હિ શઙ્કરઃ ॥ ૨૭॥

ભીમો રુદ્રો મહેશાનો ગીતશ્રુતિષુ સ સ્થિરઃ ।
સર્વાભયપ્રદો વિપ્રો વિશ્વાધિક ઉમાસખઃ ॥ ૨૮॥

પતિત્વેન સ્તુતો વેદૈઃ સર્વેષામેવ શઙ્કરઃ ।
ભયાપહોઽયં ભક્તેષુ શામ્ભવેષુ મહાત્મસુ ॥ ૨૯॥

સર્વોપાસ્યો હ્યમેયાત્મા સર્વેષાં હૃદયાન્તરઃ ।
સર્વભૂતગુહાવાસો વાસિતાજગતાં ત્રયે ॥ ૩૦॥

ઈશાવાસ્યમિદં સર્વં જગત્ ત્રિભુવનાત્મકમ્ ।
યસ્ય રૂપં ચ પૃથિવી સૂર્યચન્દ્રમસૌ મુને ॥ ૩૧॥

પૃથિવીદેવતાઃ સર્વા ન વિદન્તિ મહેશ્વરમ્ ।
પ્રિયોઽયં સર્વભૂતેષુ નાસ્ત્યસ્માજ્જગદેવ હિ ॥ ૩૨॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે સ્કન્દપ્રોક્તં શિવમહિમાવર્ણનં ૧ સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । ભીમાખ્યઃ અષ્ટમાંશઃ । અધ્યાયઃ ૩ । ૧૦-૩૨ ॥

- .. shrIshivarahasyam . bhImAkhyaH aShTamAMshaH . adhyAyaH 3 . 10-32..

Notes:

Skanda સ્કન્દ expresses about ŚivaMahimā શિવમહિમા while speaking to Jaigīṣavya જૈગીષવ્ય.

Proofread by Ruma Dewan

---

*Skandaproktam Shivamahimavarnanam 1*

pdf was typeset on July 5, 2024

Please send corrections to *sanskrit@cheerful.com*